बुद्धरूपीजनार्दन	१२९
बुद्धेश्वरी	२२
बोधानन्द	४
बौद्धदेव	४,११,२३
बौद्धदेश	२२
ब्रह्मदायक	११
ब्रह्मसायुज्य	११
ब्रह्मा	२४,२६,२८
ब्राह्मण	१७
भवाब्धि	३०
भाव	२१
भारद्वाज	२
भीमसेन	२
भुवन	२६,२७
भूमित्याग	२४
भैरव	१,२,११,१३,१४,१५,१६,१८,१९,२९
भैरवी	१,२,४,१३,१४,१५,१७,१९
भोग	१८
भूमध्वदेश	१७
मज्ञान	३०
मणिपीठ	९
मत्स्य	२६
मदिरा	२६,३०
मदिरासाधन	२६
मद्य	७,११,१४,२६,२६

विषयः।	पृष्ठा।
मद्यसाधन	२६
महाचीन	२२
महाचीनतन्त्र	४
महाचीनदेश	२८,२९
महानिशा	३१
महानीलतन्त्र	
महानीलसरस्वती	१७
महाप्रेत	९
महाविद्या	२२,२६
महावीरभाव	२४
महामाया	२८
महामोक्ष	१३
महायन्त्र	८
महायोगी	२३
महाशक्ति	२६
महाशाप	
माध्वी	४
माया	८
मारुत	२४
माहात्म्य	१३,१४,१८
मांस	९,२३ २६
मीननाथ	३२
मुण्ड	९.१६
मुद्रा	२६
मूल	६,१५
मूलाधार	३
मैथुन	८,१४,१५,२६
मोक्ष	१८
यजुर्व्वेद	२५

विषयः।	पृष्ठा।
यन्त्र	२६,८
यशः	१८
यागगृह	८
योग	२१,२४
योगमार्ग	२१
योगशिक्षा	२४
योगाभ्यास	२२ २४
योगिनी	८
योगी	२२ २३,२४ २५
योनि	८,१५.१८
योन्यर्च्चन	४
यौनिक	१०
रक्त	१७,२३
रति	९
रुद्र	१७,२४,२५,२७
रौद्री	२५
लतासाधन	१८
ललाट	१७
लक्ष्मी	९
लिङ्गभैरव	१५
वटुक	८
वज्रपुष्प	१०
वर्ण	५
वरदा	२१
वर्ष	२६
वशिष्ठ	२,४,३१,३२,२३,२४ २६,२७,२८, २९,३०
वशिष्ठानन्दनाथक	४
वशी	२४

विषयः।	पृष्ठा।
वषट्	५
वसुधा	२८
वह्निललना	८
वह्निवल्लभा	५
वाक्पति	२५
वाग्भव	३
वाल्मीकि	२
वितस्ति	१६
विधान	११,१५,१६,२७
विधि	१४
विष्णु	५,२१,२७,२६,३०
विद्या,	२६,२७,२८
वीज	५
वीर	११,१४,१५,१६,२४,२५
वीरवल्लभ	१४
वीरभाव	२५
वीरेन्द्र	१६
वीरेश	२५
वृषभ	३२
वेद	२३
वेदकार्य्य	२४
वेदगामिनी	२२
वेदवाद	१६,३०
वेदवादविरुद्ध	३०
वेदमार्ग	२४
वेदमार्गाश्रय	२४
वेदवहिष्कृत	२३
वेदान्तवित्	२२
वेदार्थनिपुण	२४

विषयः।	पृष्ठा।
वैश्य	१७
वौषट्	६
व्यापक-विन्यास	५
शक्ति	४,५,६,७,८ १०,१४,१७,२१,२२ २४ ३१
शक्तिचक्र	२४,
शपथ	१२
शव	६
शान्ति	६
शाप	२, २२
शाम्भवी	१३
शिव	६,१२,१५,१८,२४,२६
शिवा	६
शिरः	१७
शिष्य	१६
शुद्धि	३१
शूद्र	१७
शोक	३१
शौच	३१
श्री	१८
श्वासमार्ग	२४
श्मशान	६,१६
षट्पद्म	४
सत्त्वचक्र	२४
सतीर्थ	१५
सदाशिव	२,६,
सन्ध्या	६,३१
सनकानन्द	४
सच्चिदानन्दयोग	११

विषयः	पृष्ठा।
समाधि	२७
सर्व्वार्थसिद्धि	१४
सरस्वती	६,२३,२६
सहस्रदलपङ्कज	२
साधक	१०,११,१४,१५,१६,२६,३१
साधन	१६,२१,२२,२३,२६,३०
सिद्ध	१,२,१४,२३
सिद्धमन्त्री	२२
सिद्धि	११,१५,१६,२१,२४,२५,२८
सिद्धिमार्ग	२३
सिद्धिमूल	११
सुखानन्द	४
सुरद्रुम	२
सुरा	३१
सेतु	११
स्त्री	१०,२३
स्वतन्त्रतन्त्र	१६
स्वेदोद्गम	२४
स्वरदीपिका	३२
हर	२५, २७
हविष्य	२७
हस्त	१७
हिमवान्	२६
हृदय	१७
हृदम्भोज	७
हृन्मनु	८
क्षत्रिय	२,७
क्षितिमण्डल	२३
क्षेत्रपाल	८

शुद्धिपत्रम्।

पृष्ठा	पङ्क्तिः	अशुद्धम्	शुद्धम्
४	१३	औ	श्री
५	१	औ	श्री
६	१३	द्यौतनं	द्योतनं
११	३५	देवौध्यानं	देवीध्यानं
१५	१४	औ	श्री
२२	५	तस्या	तस्याः
२४	१६	चञ्चला	चञ्चलाः
२५	१२	वलौ	बली
२६	७	सुद्रा	सुद्रां
२८	१६	तां	तं

॥ तारातन्त्रम् ॥

प्रथमः पटलः ।

ओं नम स्तारिन्यै * ॥

कैलासशिखरे रम्ये देवदेवं महेश्वरम् ।
पप्रच्छ भैरवी देवी शयनीये सुखोषिता ॥ १ ॥
पुरा यो कथितो बुद्धवशिष्ठो कुलभैरवो ।
केन मन्त्रेण देवेश ! सिद्धो तो वद मे प्रभो ! ॥ २ ॥

भैरव उवाच (१) ।

स एव परमो देवो बुद्धरूपी जनार्दनः ।
उग्रतारा-महामन्त्रं पञ्चार्णं परिजप्य च ॥ ३ ॥
सृष्ट्यादिकर्म्मकर्त्ता च (२) अजरामरतां ययौ ।
वशिष्ठोप्येन(३)माराध्य नक्षत्रलोकमागतः ॥ ४ ॥

---

* ओं नमः श्रीश्रीनाथादिनाथगुरवे स्वामिने महाकालाय महाकालीयुक्ताय परमकारुणिकाय भगवते परमेश्वराय गौरीनाथाय नमः । ख ।

(१) श्रीभैरव उवाच । ख ।

(२) स्रष्टा च कर्म्मकर्त्ता च । ख । (३) प्येना . . । ख ।

योगसिद्धीश्वरो भूत्वा द्योततेऽद्यापि वल्लभे ! ।
तदुद्धारमतं (१) वच्मे यतः सर्व्वेश्वरो भवेत् ॥ ५ ॥
प्रणवं पूर्व्वमुद्धृत्य हृल्लेखा कुलकामिनी ।
कूर्च्चमस्त्रं मन्त्रराजो देवद्रुम इवापरः ॥ ६ ॥
अनेनैव समाराध्य सर्व्वेशोऽभूत् सदाशिवः ।
दुर्व्वासा-व्यास-वाल्मीकि-भारद्वाजादिकः (२) कविः ॥ ७ ॥
भीमसेनार्জ্জুनाद्यास्ते चचिया जयिनोऽभवन् (३) ।
इति ते कथितं देवि ! रहस्यं परमोत्तमम् ॥ ८ ॥
गोपनीयं प्रयत्नेन यदि स्नेहोऽस्ति मां प्रति ॥ ९ ॥

भैरव्युवाच (४) ।

त्वत्प्रसादादहं (५) देव ! श्रुतो मन्त्रः सुरद्रुमः ।
बौद्धदेवेन (६) यच्चीर्णं प्रातःकृत्यं वदस्व (७) मे ॥ १० ॥

भैरव उवाच ।

प्रातःकृत्यं प्रवच्यामि येन सिद्धो भवेन्नरः ।
उत्तरप्रहरे मन्त्री सहस्रदलपङ्कजे ॥ ११ ॥
कर्णिकान्तर्गते पीठे चन्द्रमण्डलसन्निधौ (८) ।
शुद्धस्फटिकसङ्काशं (९) शुद्धक्षौमविराजितम् ॥ १२ ॥
वराभयकरं शान्तं प्रसन्नवदनेक्षणम् ।
गन्धपुष्पादिभूषाढ्यं (१०) दयिताशक्त (११) मानसम् ॥ १३ ॥

---

(१) मथो । ख ।
(२) भरद्वाजादिकः । ख ।
(३) जयिनो रणे । ख ।
(४) श्रीभैरव्युवाच । ख ।
(५) -दयं । ख । अयमेव साधीयान् ।
(६) बुद्धदेवेन, इति युक्तः पाठः ।
(७) तदात्व मे । ख ।
(८) सन्निभे । ख ।
(९) ओं शुद्धस्फटिकसङ्काशं । ख ।
(१०) शुद्धगन्धाद्यभूषितं । क ।
(११) सक्त । क ।

इति ध्यात्वा तु गुरवे (१) पाद्याद्यै र्म्मानसै र्यजेत् (२) ।
त्रिधा वा सप्तधा वापि दशधा प्रजपेन्मनुम् (३) ॥ १४ ॥
वाग्भवं पूर्व्वमुच्चार्य्य गुरुं तद्दयिताभिधाम् ।
ओपादुकां पूजयामि नमो मन्त्रो गुरुप्रियः (४) ॥१५॥
गुह्यातिगुह्यतो गोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ १६ ॥
ॐ नमस्ते भगवन्नाथ ! शिवाय गुरुरूपिणे ।
विद्यावतारसंसिद्धौ स्वीकृतानेकविग्रह ! ॥ १७ ॥
भवाय भवरूपाय परमात्मस्वरूपिणे ।
सर्व्वाज्ञानतमोभेद-(५)भानवे चिन्मयाय ते ॥ १८ ॥
स्वतन्त्राय दयालिप्त-(६)विग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भवदायिने ॥ १९ ॥
विवेकिनां विवेकाय विमर्षाय विमर्षिणाम् ।
प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ २० ॥
स्तुत्वा (७) ऽज्ञानेति-मन्त्रेण नमस्कारं समाचरेत् ।
मूलाधारे मूलविद्या-(८)स्वरूपां कुलकुण्डलीम् ॥ २१ ॥
सूर्य्यकोटि-(९)प्रतीकाशां विषतन्तुतनीयसीम् ॥ २२ ॥
प्रसुप्तभुजगाकारां सार्द्धत्रिवलयान्विताम् ।
हंसो-मन्त्रेण तस्याश्च चैतन्यं योजयेत्ततः (१०) ॥ २३ ॥

---

(१) स्वगुरवे । ख । (२) जपेत् । ख ।
(३) संजपेत् । ग । दशधेयं जपेन्मनुम् । क ।
(४) गुरोः प्रिये !
(५) सर्व्वाज्ञानतमोभेदे । क । (६) क्लृप्त । ख ।
(७) सत्वज्ञानेन । ख । क—पुस्तके स्तुत्वेति नास्ति ।
(८) मूलविद्यां । क । (९) तड़ित्सूर्य्य । क ।
(१०) हंसमन्त्रेण तस्यास्तु उत्थानं समुपाचरेत् । ख ।

पद्मषट्कं भेदयित्वा कर्णिकाधः समानयेत् ।
ततश्च संस्मरेत् कौलान् गुरूनेतान् कुलेश्वरि ! ॥ २४ ॥
प्रह्लादानन्दनाथाख्यः सनकानन्द एव च ।
कुमारानन्दनाथश्च (१) वशिष्ठानन्दनाथकः ॥ २५ ॥
क्रोधानन्द-(२)सुखानन्दौ ज्ञानानन्द स्ततःपरम् ।
बोधानन्द स्ततो नित्यं कारणानन्दन-न्दिताः ॥ २६ ॥
विघूर्णनयना स्ताट्क्शक्तिसङ्गविराजिताः ।
ततो विन्दुस्फुरन्माध्वी-धारया तान् प्रतर्पयेत् ॥ २७ ॥
तस्मात्तेनैव मार्गेण स्वस्थानं प्रापयेत् पराम् ।
तत्प्रभापटलै र्देवि ! पाटलं (३) स्वं विचिन्तयेत् ॥ २८ ॥
इति ते कथितं देवि ! प्रातःकृत्यमनुत्तमम् ।
गोपनीयं मम-(४)प्रीतिकृतेऽवश्यं सुरेश्वरि ! ॥ २९ ॥

॥ इति श्रीतारातन्त्रे प्रथमः पटलः ॥

द्वितीयः पटलः ।

श्रीभैरव्युवाच ।

श्रुतमेतन्महाभाग ! प्रातःकृत्यमहो महत् ।
महाचीनाख्यतन्त्रे च त्रिविधं पूजनं हि यत् ॥ १ ॥
उक्तवान् बुद्धदेवेश (५) स्तत्र योन्यर्चनं श्रुतम् ।
मानसं यान्त्रिकञ्चैव श्रोतुमिच्छामि साम्प्रतम् ॥ २ ॥

---

(१) कुमारानन्दनाथाख्यो । ख । (२) क्रोधानन्दः सुखानन्दो । ख ।
(३) पटलं स्वं विचिन्तयेत् । क । पाटलं स विचिन्तयेत् । ख ।
(४) प्रतिकृते अवश्यं सुरसुन्दरि । ग । (५) बुद्धदेवोसौ तत्र । ख –ग ।

श्रीभैरव उवाच ।

मनःपूजा विधिं वच्ये न्यासं पूर्व्वं (१) शृणु प्रिये ! ।
अकृते न्यासजाले हि अधिकारो न विद्यते ॥ ३ ॥
ऋष्यादिन्यासकञ्चैव करागङ्गन्यास एव च ।
वर्ण-(२)व्यापकविन्यासो पीठन्यास स्ततः परम् ॥ ४ ॥
अच्छोभ्यश्च (३) ऋषिः प्रोक्तो बृहती च्छन्द ईरितम् ।
उग्रतारा देवतोक्ता कूर्चबीजमुदाहृतम् ॥ ५ ॥
शक्तिरस्त्रं शेषवर्णाः कीलकानि भवन्त्युत ।
अखिलवाग्रूपिणीमुक्ता हृदयाय (४) नमो वदेत् ॥ ६ ॥
अखण्डवाग्रूपिणीमुक्ता शिरसे वह्निवल्लभा (५) ।
ब्रह्मवाग्रूपिणीमुक्ता शिखायै वषड़ित्यपि ॥ ७ ॥
विष्णुवाग्रूपिणीमुक्ता कवचाय हुमीरितम (६) ।
रुद्रवाग्रूपिणी (७) नेत्रचयाय वौषड़ित्यपि ॥ ८ ॥
सर्व्ववाग्रूपिणीमुक्ता अस्त्राय फड़िति स्मरेत् ।
षड्दीर्घमायया चैव बीजानामेव (८) चोच्चरेत् ॥ ९ ॥
अङ्गस्थानेऽङ्गुलीनान्तु पाणितो योजनञ्चरेत् (९) ।
आदिल्लवर्णपर्य्यन्तान् हृदये विन्यसेत् प्रिये ॥ १० ॥
एकाराद्यान् डादिठान्तान् (१०) क्रमेण बाहुयुग्मके ।
णादिभान्तान् मकारादिल्लान्तान् जङ्घाहृये प्रिये ! ॥ ११ ॥

---

(१) न्यासं पूर्व्वं । ख ।
(२) चण्डीव्यापक । क ।
(३) अच्छोभ्योऽत्र । ख ।
(४) हृदयाय । क ।
(५) वल्लभा । क ।
(६) ङ्कमिरितम् । क ।
(७) रुद्रवाग्रूपिणीमुक्ता । ख ।
(८) बीजान्ते नामचोच्चरेत् । ख ।
(९) अङ्गेति क-पुस्तके नास्ति ।
(१०) ठान्तान् । ग । एषान्ताऽऽदिठान्तांश्च क्रमेण बाहुयुग्मके । ख ।

मूलेन व्यापकं न्यस्य पीठन्यासं समाचरेत् ।
हृत्सरोजे सुधासिन्धुं (१) मध्ये द्वीपं सुवर्णजम् ॥ १२ ॥
परितः पारिजातांश्च मध्ये कल्पतरुं ततः (२) ।
तन्मूले हेमनिर्म्माणं द्वाश्चतुष्टय-(३)भूषितम् ॥ १३ ॥
मण्डपं मन्दवातेन पराक्रान्तं सुधूपितम् ।
तत्र यन्त्रं (४) प्रतिष्ठाप्य तत्र पूजां समाचरेत् ॥ १४ ॥
एवं पीठमये देहे चिन्तयेदुग्रतारिणीम् ।
हृदिपाद्यत्रयमादाय जीवन्यासं समाचरेत् ॥ १५ ॥
इति ते कथितं कान्ते ! न्यासजालमनुत्तमम् (५) ।
परिपाटी गुरो र्ज्ञेया न्यासानां रचनं (६) प्रिये ! ॥ १६ ॥
ततः पूजां प्रकुर्व्वीत येन तन्मयतामियात् ।
स्नायाच्च विमले तीर्थे पुष्करे हृदयास्थिते ॥ १७ ॥
शिवशक्ति समायोगः सन्ध्या प्रोक्ता च तान्त्रिकैः ।
विन्दुच्युतसुधाभि स्तां (७) तर्पयेत् प्राणवल्लभे ! ॥ १८ ॥
तत स्तत्परिवारादीन् (८) तत्शरीरे विलाप्य च ।
उद्वर्त्तनादिकं दत्त्वा स्नापयेद्दिव्यवारिणा ॥ १९ ॥
मृदुवस्त्रेण संमार्ज्य (९) नयने कज्जलं ददेत् ।
ललाटे चैव सिन्दूरं अलक्तं चरणाम्बुजे ॥ २० ॥

---

(१) सुधासिन्धुमध्ये द्वीपं सुवर्णकम् । क ।
(२) स्मरेत् । ख । (५) मनोहरं । ख—ग ।
(३) द्वारचतुष्टय । ख । (६) रचने । ख ।
(४) मन्त्रं । ख । (७) सुधाभिश्च । ख ।
(८) परिवाराणि । ग । ततश्चेत् परिवाराणि तत्शरीरे विभाव्य च । ख ।
(९) संप्रोच्छ्य । क । मृदुवस्त्रैः शनैः प्रोच्छ्य । ख ।

चिन्तयेन्मनसा मूर्त्तिं सर्व्वालङ्कारभूषिताम् ।
ततः सोऽहमिति ध्यात्वा पाद्यं दद्यात् पदोः प्रिये ! ॥२१॥
मौलावर्घ्यं मुखे तोयं गन्धोऽङ्गे (१) सर्व्वतः क्षिपेत् ।
सुगन्धि-श्वेतलौहित्यं (२) जवां कृष्णापराजिताम् ॥ २२ ॥
पदे (३) शीर्षे तथा कर्णे कण्ठे मालां निधापयेत् ।
सम्मुखे धूपदीपौ च नैवेद्यं भोजयेदथ ॥ २३ ॥
कारणं पललं भूयः कारणं मौनमुत्तमम् ।
पुनश्च कारणं देयं ततो भर्জ্জितशालिजम् ॥ २४ ॥
पुनर्म्मद्यं ततोऽपूपशष्कुलीं देवि ! दापयेत् ।
ततो मद्यं प्रदायैव नाना-तेमन-संयुतम् * ॥ २५ ॥
दधिक्षीराज्यसहितं दापयेदोदनं प्रिये ! ।
आचमनं ततो दद्यात्ताम्बूलं विनिवेदयेत् ॥ २६ ॥
ततो वै मानसं जापं कृत्वा तर्पण (४) माचरेत् ।
स्तुत्वा (५) नत्वा तत्तदङ्गदेवता[:] प्रापयेदथ ॥ २७ ॥
स्व स्व स्थानं ततः शेषं शक्तिभि र्भोजयेत् स्वयम् (६) ।
ततः सोऽहमिति ध्यायेदात्मानं तारिणीमयम् ॥ २८ ॥
इदं मानसमाख्यातम् पूजनं देवि ! (७) दुर्लभम् ।
एकान्तनिर्म्मलं चित्तं हृदम्भोजार्च्चनात् प्रिये ! ॥ २९ ॥

---

(१) गन्धोऽग्ये । ख ।
(२) श्वेतलौहित्यजवाकृष्णापराजिता (:) । ख ।
* तेमनं व्यञ्जनं । (३) पदोः शीर्षे । ख ।
(४) कृत्वार्पणमथाचरेत् । क ।
(५) ततः स्तुत्वा च नत्वा च तदङ्गं प्रापयेदथ । ख ।
(६) सुखं । ग । (७) देव । ख ।

गुर्व्वर्च्चोचित-(१) काले च प्रातर्मध्याह्नतोऽपि वा ।
कर्त्तव्य (२) मेतद्विधिवद्गुरुपादप्रसादतः ॥ ३० ॥
अथातः संप्रवक्ष्यामि पूजां यत्नसमीरिताम् ।
अथ यागगृहं गत्वा पुष्पाहरणमाचरेत् ॥ ३१ ॥
शताभिषेकेति पदं द्विरुच्चार्य्य ततो वदेत् ।
कूर्च्चास्त्रवह्निललना-(३) ताराद्यः पुष्पकर्षणे ॥ ३२ ॥
मायां पूर्व्वं समुच्चार्य्य आधारशक्तिसंवदेत् ।
कमलासनं ङेन्तञ्च हृन्मनुश्चासनार्च्चने ॥ ३३ ॥
अर्घ्यपात्रं स्थापयित्वा पञ्चानां शोधनञ्चरेत् ।
आदौ (४) शोधनमेवोक्तं नीलतन्त्रे (५) तव प्रिये ! ॥ ३४ ॥
द्वितीयशोधने देवि ! प्रतद्विष्णु-मनुं जपेत् ।
तृतीयशोधने देवि ! चास्त्रकेनैव मन्त्रवित् ॥ ३५ ॥
तद्विष्णो(६)रिति मन्त्रेण चतुर्थशोधनञ्चरेत् ।
प्रतद्विष्णु(७)रिति मन्त्रेण स्वयम्भ्वादिविशोधनम् ॥ ३६ ॥
शक्तेषु शोधनेनैव मैथुनं शुध्यति प्रिये ! ।
ततो देवि ! महायन्त्रं कथयामि तव प्रिये ॥ ३७ ॥
सयोनिं चन्दनेनाष्टपत्रमद्मं लिखेत्ततः ।
चतुरस्रं चतुर्द्वारं यन्त्रं देवि ! समालिखेत् ॥ ३८ ॥
गणेशं प्राचि संपूज्य दक्षिणे वटुकं यजेत् ।
पश्चिमे क्षेत्रपालञ्च योगिनीमुत्तरे यजेत् ॥ ३९ ॥

---

(१) गुरूक्तोचितकाले च । ख ।
(२) कर्त्तव्यं तेन विधिवत् । ख ।
(३) ललनां । क ।
(४) आदि । ग ।
(५) चीनतन्त्रे । ख ।
(६) तद्विष्णुरिति । क—ग ।
(७) ओं विष्णुरिति मन्त्रेण स्वयम्भ्वादिशोधनम् । ख ।

श्मशानं तत्र संपूज्य (१) तत्र कल्पद्रुमं यजेत् (२) ।
तन्मूले मणिपीठञ्च नानामणिविभूषितम् ॥ ४० ॥
नानालङ्कार-भूषाढ्यं मुनिदेवैश्च मण्डितम् ।
शिवाभि र्व्वहुमांसास्थि-मोदमानाभिरन्ततः ॥ ४१ ॥
चतुर्द्दिक्षु शवान् (३) मुण्डांश्चिताङ्गारास्थिभूषितान् ।
(चतुर्द्दिक्षु शवमुण्डचिताङ्गारास्थि-भूषितम्)
ह्सौः सदाशिवेत्युक्त्वा (४) महाप्रेत ततः परम् ॥ ४२ ॥
पद्मासनाय हृदयं पीठन्यासमनुर्म्मतः ।
लक्ष्मीः सरस्वती चैव रतिः प्रीतिस्तथैव च ॥ ४३ ॥
कीर्त्तिः शान्तिश्च (५) पुष्टिश्च तुष्टि रित्यष्टशक्तयः ।
एताः पूज्याः पत्रदेशे क्रमेण प्राणवल्लभे ! ॥ ४४ ॥
ततः पुष्पाञ्जलिं नीत्वा कूर्म्मतत्त्वेन कौलिकः ।
हृदये द्योतनं तेजः परिवारसमन्वितम् ॥ ४५ ॥
यंकारादितया देवि ! शवोपरि निधापयेत् ।
आं सोहमिति मन्त्रेण जीवन्यासं समाचरेत् ॥ ४६ ॥
ततः पाद्यादिना देवि ! पूजयेदुग्रतारिणीम् ।
नमः स्वाहा स्वधाश्चैव नमो वौषट् तथा क्रमात् ॥ ४७ ॥
ततो निवेदयामीति सर्व्वं दद्यान्महेश्वरि !
इदं (६) द्रव्यं ततः प्रोच्य देवताबोधनं ततः ॥ ४८ ॥

---

(१) संचित्य । ख । (२) स्मरेत् । ग ।
(३) चतुर्द्दिक्षु शवमुण्डाचिताङ्गारास्थिभूषितम् । ख ।
(४) महाप्रेतेति तत् परम् । ख—ग ।
(५) कान्तिश्च । क । (६) इति द्रव्यं । क ।

वज्रपुष्पं प्रतिच्छेदं ह्रूँ-फट्-स्वाहा ततो वदेत् ।
मूलमन्त्रं समुच्चार्य्य ङेन्तं नाम (१) नियोजयेत् ॥ ४९ ॥
ततश्च परिवाराणि पूजयेद्देवि ! कौलिकः ।
इदं द्रव्यं समुच्चार्य्य परिवारेभ्यो नमो(२)ऽन्ततः ॥ ५० ॥
प्रणवाद्येन मनुना कुलीनः पूजनञ्चरेत् ।
अक्षोभ्यं * मौलिदेशे तु प्रागाद्यष्टदलेषु च ॥ ५१ ॥
शक्तयोऽष्टौ (३) भैरवांश्च द्वारेषु चतुरः सुरान् ।
वायव्यादीशपर्य्यन्तं गुरुपङ्क्ति र्व्यवस्थिता ॥ ५२ ॥
ततो जप्त्वा स्तवैः स्तुत्वा नत्वा च विसृजेद्बुधि ।
नैवेद्यं साधकेभ्यश्च स्त्रीभ्यो दद्यान्न कुत्रचित् ॥ ५३ ॥
इति ते कथितं भद्रे ! तारायाः पूजनं महत् ।
मानसं यान्त्रिकञ्चैव नित्यं नृणामिति स्मृतम् (४) ॥५४॥
नाधिकारो यौनिके च (५) स्त्रीणां मानस-यन्त्रयोः ।
विधेयं पूजनं देवि ! न कुर्य्याद्वा निजेच्छया (६) ॥ ५५ ॥

॥ इति श्रीतारातन्त्रे द्वितीयः पटलः ॥

---

(१) नमो । ग ।　　(२) नमस्ततः । ख ।

* अक्षोभ्योत्पत्तिविवरणं तोड़लतन्त्रे प्रथमपटले ।

"समुद्रमथने देवि ! कालकूटं समुत्थितम् ।
सर्व्वे देवाश्च देव्यश्च महाक्षोभमवाप्नुयुः ।
क्षोभादिरहितं यस्मात् पीतं हालाहलं विषम् ।
अतएव महेशानि ! अक्षोभ्यः परिकीर्त्तितः ।
तेन सार्द्धं महामाया तारिणी रमते सदा ॥

(३) दक्षेष्टौ भैरवाद्यष्टौ । ख ।　　(५) यौनिकेयञ्च । क ।
(४) स्थितं । क ।　　(६) कुर्य्याद्वापि निजेच्छया । ग ।

तृतीयः पटलः ।

श्रीभैरव उवाच ।

अथातः संप्रवक्ष्यामि शृणु त्वं पर्व्वतात्मजे !
पात्रमेकं त्रयं वापि त्रयं वा पञ्च वा प्रिये ! ॥ १ ॥
पिवेद्वीरवरश्रेष्ठो यः स रुद्र इतोरितम् ।
सच्चिदानन्दयोगेन यः कारणमदो भवेत् ॥ २ ॥
स एव परमानन्दो ब्रह्मसायुज्यदायकः ।
तस्माद्गुरुं सिद्धिमूलं साधकः कारणं पिवेत् ॥ ३ ॥
विनानन्दं सच्चिदायाः पानं यत्कारणस्य च ।
तन्न चानन्द-जनकं बौद्धदेव-वचो यथा ॥ ४ ॥
पूज्यो गुरुः सदा चात्र तद्वत्तत्तनयोपि च ।
तत्पत्नी सर्व्वभावेन सदा कौलिकपूरुषैः ॥ ५ ॥
तस्याः सन्तोषमात्रेण देवी तुष्टा भवेत् प्रिये ! ।
तस्मात् स्तोत्रैर्धनैर्वाक्यैः (१) स्तोषयेत् ब्रह्मदायकम् ॥६॥
नक्तं जपविधानञ्च शृणुष्वैकमनाः प्रिये ! ।
आदौ षड़ङ्गं विन्यस्य गुरोर्ध्यानं ततःपरम् ॥ ७ ॥
मन्त्रध्यानं * ततःपश्चात् देवीध्यानं तत श्चरेत् (२) ।
सेतुरूपं तत स्तारं जप्त्वा जपमथाचरेत् ॥ ८ ॥

---

(१) तस्मात् तत्तोषयेद्वाक्यैः । ख । (२) परम् । ग ।

* देव्या ध्येयरूपं व्याख्यातं भगवता शङ्करेण, तच्च तारारहस्यवृत्तिकारो लिख्यते "तस्मिन् विश्वव्यापके वारिणि त्र्याः - कारादक्षपङ्कजं तदुपरि टाङ्कारात्

पुनस्तारं ततो देवीध्यानं कृत्वा समर्पयेत् ।
शिवोऽहं तारिणीरूपमात्मानमिति चिन्तयेत् ॥ ९ ॥
परिवारमयश्चाहमिति ध्यायेदनारतम् (१) ।
इति ते कथितं देवि ! रहस्यं तारिणीमयम् ॥ १० ॥
न देयं पशवे तस्मात् शपथो मे त्वयि प्रिये ! ॥ ११ ॥

॥ इति श्रीतारातन्त्रे तृतीयः पटलः ॥

श्वेतपङ्कजं तदुपरि नीलसन्निभं ह्रङ्कारं ध्यात्वा तत्र ह्रङ्कार-बीजभूषितां कर्त्तृकां ध्यायेत् । कर्त्तुरुपरिगतं आत्माभेदेन देवतां ध्यायेत् । आं ह्रीं क्रोँ स्वाहेति एकादशवारं जपन् आत्मनः प्राणान् प्रतिष्ठाप्य ध्यायेत् ।.....
तदुपरि नीलसन्निभं ह्रङ्कारं ध्यात्वा ह्रङ्कारभूषितां कर्त्तृकां ध्यायेत्, (तदुपरि) खर्व्वामभिनव-जलदनीलाम्, लम्बोदरीं व्याघ्रचर्म्मावृतां कटौ, पीनोन्नतपयोधरां, रक्तवर्त्तुलत्रिनेत्रां ललज्जिह्वां दंष्ट्राकरालवदनां पिङ्गोग्रैकजटाजूटां तदुपरि पार्श्वद्वये लम्बमान-नीलोत्पलमालां, अतिनीलनागवद्धजटाजूटां ललाटे श्वेतास्थि-पट्टिकासमेत-कपालपञ्चतयां जवाकुसुमसङ्काश-तक्षकनागकृतकुण्डलां अतिशुभ्र-नागकृतहारां दूर्व्वादलश्याम-नागकृतयज्ञोपवीतां चतुर्भुजां तदुपरि दक्षिणे सरक्तमांसखण्डमण्डित-सृष्टिनिविष्टजटाजूट-संलग्नखड्गभूषितकरां वामे रक्त-नाल-किञ्जल्किकस्थर-नीलोत्पलकरां अधस्तात् दक्षिणे बीजभूषितछिन्नकर्त्तृक (का)-भूषितकरां अधस्तात् वामे त्रिजगज्जाड्यसमेत-शुभ्रकपालमण्डितकरां भुज-चतुष्टये शुभ्रनागकृतकेयूरां कनकाभनागकृतकङ्कणां शवारूढां निर्भरयत्नणाभि-प्रायेण शवहृदयसङ्कुचित-दक्षिणचरणां शवपार्श्वहृदयस्थित-प्रसारितवामचरणां कुन्दाभनागकृतकटिसूत्रां हेमवर्णनागकृतनूपुरां सद्यःकृत्तगलद्रुधिरधारान्योन्य-केशग्रथित-श्रोयुतपादपद्मप्रलम्बि-पञ्चाशन्मुण्डमालां ज्वलदनलचितामध्यस्थां द्वीपिचर्म्मकृतोत्तरीयां योषिदखिलालङ्कारालङ्कृतां मौलावक्षोभ्य-शोभितां सावेश-स्मेरवदनां एवंभूतमात्मानं ध्यायेदिति भूतशुद्धिः ।"

(१) परिवारमतश्चाहं इति ध्यायेदनावृतम् । ख ।

चतुर्थः पटलः ।

श्रीभैरव्युवाच ।

यत् प्रसादादिदं सर्व्वं कुलाचारविधानकम् ।
तस्यैवाद्यन्त-(१)माहात्म्यं श्रोतुमिच्छामि साम्प्रतम् ॥ १ ॥

श्रीभैरव उवाच ।

गुरुः परमगुरुश्चैव परापरगुरु स्तथा ।
परमेष्टिगुरु श्चैव चत्वारो गुरवः स्मृताः ॥ २ ॥
ऋषिरत्र गुरुः प्रोक्तो (२) मन्त्रदः परमो गुरुः ।
परापरगुरु श्चाहं त्वमेव (३) परमेष्टिका ॥ ३ ॥
सर्व्वेषामेव मध्ये तु प्रधानं परमो गुरुः ।
गुरो र्विना (४) महामोक्षं न काशी न च गङ्गया (?) ॥४॥
माहात्म्यं तस्य (५) वक्ष्यामि येन तुष्टा च शाम्भवी ।
गुरुमन्त्रेष्टदेवीनामेकत्वं परिकथ्यते ॥ ५ ॥
तत्पत्नी च विशेषेण परदेवीविशेषभाक् ।
सरल्या(६)ऽसरला वापि निष्ठुरा वा प्रियोदिता (७) ॥ ६ ॥

---

(१) तस्यैवाद्याद्य । ख । तस्यैवाद्यस्य माहात्म्यं श्रोतुमिच्छामि संप्रति । ग ।
(२) (श्रोक्तो) । ख ।
(३) गुरुस्त्वं परमेष्टिका । ख ।
(४) एतत् श्लोकार्द्धं क ख-पुस्तकयो र्नास्ति ।
(५) तेन । क ।
(६) सरला सरला : क—ख ।
(७) तथोदिता । ख ।

कुत्सिता (१) व्याधिता वापि मूढ़ाऽमूढ़ापि वा प्रिये ! ।
सदेष्टदेवीभावेन भावनीया (२) कुलोत्तमैः ॥ ७ ॥
तत्तनुजोदितञ्चैव यद्दा साधकभाषितम् ।
यत्नेनैव विधातव्यमशक्ये यत्नवान् भवेत् ॥ ८ ॥
वीरोच्छिष्टं विनामद्यं शक्त्युच्छिष्टं तदप्युत ।
भोजयेन्निर्व्विकल्पेन मनसा वीरवल्लभः ॥ ९ ॥
पुरा-(३)प्रोक्तानि पञ्चैव एकं वा शृणु भैरवि !
शोधयित्वा निवेद्यैव योऽश्नीयात् स च भैरवः ॥ १० ॥
सुसिद्धाः (४) पीठसंस्था ये साधका स्तेऽर्च्चनाश्रयाः ।
गुरु-(५)तद्दयितापुत्रपुत्री-साधकयोषितां ॥ ११ ॥
यत्रेच्छा वर्त्तते तत्तु समर्प्यं (६) परमेश्वरि ! ।
अवश्यं तारिणीमन्त्रे शक्तिपूजा विधीयते ॥ १२ ॥
निजकान्तेष्टदेवी तु (७) पूजनीया विशेषतः ।
समानदेवतामन्त्रं निजकान्ता जपेद्यदि ॥ १३ ॥
तदा सर्व्वार्थसिद्धिः स्यात् तुष्टा भवति तारिणी ।
शरीरार्द्धं स्मृता कान्ता यस्मात्तद्यत्नवान् भवेत् ॥ १४ ॥
तस्याः किञ्चिच्च माहात्म्यं चीनतन्त्रे मयोदितम् ।
मैथुने वर्जनीया या स्तासां विधि रिहोच्यते ॥ १५ ॥

---

(१) कुत्सिताऽकुत्सितावापि । ग ।
(२) सदेष्टदेवीं भावयन् भावनीया कुलोत्तमैः । ख ।
(३) पूजनीया । क ।
(४) सुसिद्धापीठसंस्थायै साधकास्ते धनाश्रयाः ख ।
(५) गुरुस्तद्दयिता । ख ।
(६) समर्प्य । ख । (७) निजकान्तैरष्टदेव्यः । ख ।

गुरुपत्नी गुरुसुता गुरुपुत्रवधू स्तथा ।
सतीर्थस्य तु वीरस्य साधकस्य तथा प्रिये ! ॥ १६ ॥
कान्तायां मन्त्रपुत्रायां रमणान्नारकी भवेत् ।
मैथुनस्य विधानन्तु कथ्यते शृणु भैरवि ! ॥ १७ ॥
अधः कृत्वा (१) महादेवीं स्वयं भैरवरूपधृक् ।
पुरतो मूलमुच्चार्य्य धर्म्माधर्म्मादिकं पठन् ॥ १८ ॥
गजतुण्डाख्यतत्त्वेन योजयेल्लिङ्गभैरवम् ।
तस्मात् शतं विंशतिं वा जप्त्वा तेजस्तु पातयेत् ॥ १९ ॥
मूलान्ते तु (२) प्रकाशेति वचनं परिपठ्य (३) च ।
इति ते कथितं देवि ! यथोक्तं वटुरूपिणा ॥ २० ॥
सिद्धिप्रदं समाचाराद् (४) गोपनीयं स्वयोनिवत् ॥ २१ ॥

॥ इति तारातन्त्रे चतुर्थः पटलः ॥

पञ्चमः पटलः ।

श्रीभैरव्युवाच ।

त्वत्प्रसादान्महादेव ! ज्ञातमेतन्मयाखिलम् ।
पुरश्चरणहीनेन मन्त्रेण न फलं भवेत् ॥ १ ॥
तस्माच्च फलदानन्तु पुरश्चरणमुच्यताम् *।

---

(१) एवं कृत्वा । ख । (३) परिपठ्यते । ख ।
(२) मूलान्ततः । क—ख । (४) समाचारं । क ।
* श्रीभैरव्युवाच इत्यादि पुरश्चरणमुच्यतां इत्यन्तं क ग-पुस्तकयो र्नास्ति ।

श्रीभैरव उवाच ।

अथातः संप्रवक्ष्यामि पुरश्चरणमुत्तमम् ।
कुजे वा शनिवारे वा नरमुण्डं समाहरेत् ॥ २ ॥
वितस्तिमात्रे खाते तु निखनेत् सङ्गवर्ज्जितः (१) ।
तत्र नक्तं दशशतं प्रजपेन्मन्त्रसिद्धये ॥ ३ ॥
अनेनैव विधानेन (२) पुरश्चर्य्या विधीयते ।
अथवान्यप्रकारेण पुरश्चरणमुच्यते ॥ ४ ॥
गुरुं तद्दयितां वापि तत्सुतं तत्सुताञ्च वा ।
देववत् पूजनं कृत्वा जपेत्तावद् वरानने ! ॥ ५ ॥
अष्टाधिकं शतं वापि पुरश्चरणमुच्यते ।
अथवा मूर्द्धिपद्मे तु ध्यात्वा पूजां विधाय च ॥ ६ ॥
अष्टाधिक-(३)सहस्रञ्च जपेद्वैरवरूपधृक् ।
अनेनैव विधानेन पुरश्चरणमुच्यते ॥ ७ ॥
अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
चतुर्दश्यीं समारभ्य यावदन्या चतुर्दशी ॥ ८ ॥
सहस्रं प्रत्यहं साष्टं जपेत् (४) सिद्धीश्वरो भवेत् ।
एतत् सर्व्वं श्मशाने च रात्रौ वीरै र्विधीयते ॥ ९ ॥
इति ते कथितं भद्रे ! (५) पुरश्चरणमुत्तमम् ।
गोपनीयं प्रयत्नेन जनन्या जारवत् प्रिये ! ॥ १० ॥

---

(१) संस्थाप्य प्रजपेत् सङ्गवर्ज्जितः । ख ।
(२) प्रकारेण पुरश्चर्य्या प्रगीयते । ख ।
(३) अष्टाधिकं । ख ।
(४) जप्त्वा । ख । (५) कान्ते । क ।

जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः ॥ ११ ॥
सकृत् द्विधा (१) त्रिधा वापि चतुर्द्धा युगभेदतः ।
कर्त्तव्यञ्च प्रयत्नेन पुरश्चरणमुत्तमम् ॥ १२ ॥
इदानीं रक्तदानस्य विधानं वरवर्णिनि ! ।
ग्राम्यारण्यजलस्थानां रुधिरं प्रीतिबर्द्धनम् ॥ १३ ॥
घृताक्तं मधुनाक्तञ्च विशेषात् प्राणवल्लभे ! ।
जन्तुरक्तेन सम्पूर्ण-कलसात् पर्व्वतात्मजे ! ॥ १४ ॥
तिलप्रमाणं रुधिरं निजदेहस्य शस्यते ।
ललाट-हस्त-हृदय-शिरोभ्रूमध्य-देशतः ॥ १५ ॥
स्वदेहरुधिरे दत्ते रुद्रदेह इवापरः ।
ब्राह्मणो यदि वा क्षत्रो (२) वैश्यः शूद्रश्च एव वा ॥ १६ ॥
प्रदद्यान्निजरक्तञ्च मन्त्रयित्वा प्रयत्नतः ।
शक्तीनां नाधिकारोऽस्ति स्वदेहरुधिरार्पणे ॥ १७ ॥
मन्त्रान्तरं प्रवक्ष्यामि शृणु भैरवि ! सादरम् ।
पूर्व्वोक्तमन्त्रराजस्य मध्यबीजत्रयं प्रिये ! ॥ १८ ॥
कुल्लुका नाम देवी च महानीलसरस्वती ।
एकैव हि महादेवी नाममात्रं (३) त्रिधा भवेत् ॥ १९ ॥
प्रणवव्यतिरेकेण तृतीयैकजटा भवेत् ।
यथा पञ्चाक्षरी ब्राह्मी तथा वर्णचतुष्टयम् (४) ॥ २० ॥

---

(१) सकृद्द्विधा । ग ।
(२) क्षत्री । ख ।
(३) नामभेदात्त्रिधा भवेत् । ख ।
(४) तथा वर्णचतुष्टया । ख ।

माहात्म्यं (१) न च भेदः स्यात् साम्यमित्यभिधीयते ।
इति ते कथितं तत्त्वं दुर्ल्लभं मयका प्रिये ॥ २१ ॥
गोपनीयं प्रयत्नेन योनिः परनरे यथा ॥ २२ ॥

॥ इति श्रीतारातन्त्रे पञ्चमः पटलः ॥

षष्ठः पटलः ।

श्रीभैरव उवाच । (२)

अथान्यत् संप्रवक्ष्यामि रहस्यं तारिणीमयम् ।
उग्रादित्रयमन्त्रस्य माहात्म्यं वर्णयाम्यहम् (३) ॥ १ ॥
संक्षेपत स्तथापीह वर्णयामि महेश्वरि ! (४)
तारामन्त्रविदो मन्त्री कालीमन्त्रविद स्तथा ॥ २ ॥
शिवादप्यधिको देवि ! नात्र कार्य्यश्च संशयः ।
तारामन्त्रं विना देवि ! कालिकामन्त्रमेव च ॥ ३ ॥
नाप्नुयात् परमेशानि ! भोगमोक्षौ यशःश्रियौ (५) ।
तारिणीहृदयज्ञानी लतासाधन-तत्परः ॥ ४ ॥
पञ्चमप्राशनप्राज्ञो देवैरपि नमस्यते ।
निजकान्ता-स्वरूपेण निजबन्धुस्वरूपतः ॥ ५ ॥

---

(१) माहात्म्ये । ख ।
(२) क-ग पुस्तकयो र्नास्ति ।
(३) माहात्म्यवर्णनामहम् । क—ग ।
(४) वरानने ! । ख ।
(५) भोगमोक्षयशःश्रियः । ग ।

दारिद्र्येण विरोधेन न्यक्कारादिप्रयोगतः ।
पीड़ादिना विधीयेत देवै भङ्गोऽत्र साधने ॥ ६ ॥
तस्माद्यत्नेन वीरेन्द्रो गुरवे विनिवेदयेत् ।
सर्व्वथा सर्व्वयत्नेन सर्व्वोपास्या च तारिणी ॥ ७ ॥
भद्राभद्रविचारञ्च यः करोति स दुर्मतिः ।
इति ते कथितं तत्त्वमनुष्ठेय (१) समासतः ॥ ८ ॥
दर्शनाङ्कृतशाक्ता ये सुखन्ते परिभुञ्जते ।
तारातन्त्रं चीनतन्त्रं कालीतन्त्रं गुरूदितम् ॥ ९ ॥
सर्व्वथा गोपनायैव (२) शक्तिं वक्त्रःस्थलेऽर्पयेत् ।
देयं शिष्याय शान्ताय साधकाय महात्मने ॥ १० ॥
विलासिने स्वतन्त्राय गुरुतन्त्राय सुव्रते ! ।
अन्यद्यन्नोक्तमत्रापि तत्सर्व्वं गुरुवक्त्रतः ॥ ११ ॥
विरुद्धं वेदवादेऽपि श्रोतव्यं नात्र संशयः ॥ १२ ॥

॥ इति श्रीभैरवभैरवीसंवादे तारातन्त्रे षष्ठः पटलः ॥

[समाप्तोऽयं ग्रन्थः ।]

---

(१) यदुक्तञ्च समासतः । ख । अनुष्या (ष्ठा) य । ग । अनुष्ठा च इति भवितुं युक्तः ।

(२) गोपयेदेव । ग ।

APPENDIX.

बुद्धवशिष्ठवृत्तान्तः।

(१)

[रुद्रयामले सप्तदशपटलः ।]

वशिष्ठो ब्रह्मपुत्रोऽपि चिरकालं सुसाधनम् ।
चकार निर्जने देशे कृच्छ्रेण तपसा वशी ॥
षट्सहस्रं वत्सरञ्च व्याप्य योगादिसाधनम् ।
तथापि साक्षाद् गिरिजा न बभूव महीतले ॥
ततो जगाम क्रुद्धोऽसौ तातस्य निकटे प्रभुः ।
सर्व्वं तत्कथयामास स्वीयाचारक्रमं प्रभो ! ॥
अन्यमन्त्रं देहि नाथ ! एषा विद्या न सिद्धिदा ।
अन्यथा सुदृढ़ं शापं तदाग्र (त्वदग्रे) प्रददामि हि ॥
ततस्तं वारयामास एवं न कुरु भो ! सुत !।
पुनस्तां भज भावेन योगमार्गेण पण्डितः ॥
ततः सा वरदा भूत्वा आगमिष्यति तेऽग्रतः ।
सा देवी परमा शक्तिः सर्व्वसङ्कटतारिणी ॥
कोटिसूर्य्यप्रभा नीला चन्द्रकोटिसुशीतला ।
स्थिरविद्युल्लताकोटिसदृशी कालकामिनी ॥

सर्व्वस्वरूपा सर्व्वाद्या धर्म्माधर्म्मविवर्जिता ।
शुद्धचीनाचाररता शक्तिचक्रप्रवर्त्तिका ॥
अनन्तानन्तमहिमा संसाराणवतारिणी ।
वृहेश्वरी बुद्धिरूपा अथर्व्ववेदशाखिनी ॥
सा पाति जगतां लोकां स्तस्या कर्म्म चराचरम् ।
भज पुत्र ! स्थिरानन्दः कथं शम्भुं समुद्यतः ॥
एकान्तचेतसा नित्यं भज पुत्र दयानिधे ।
तस्य (स्या) दर्शनमेवं हि अवश्यं समवाप्स्यसि ॥
एतच्छ्रुत्वा गुरो र्व्वाक्यं प्रणम्य च पुनः पुनः ।
जगाम उदधे स्तीरे वशी वेदान्तवित् शुचिः ॥
सहस्रवत्सरं सम्यक् जजाप परमं जपम् ।
आदेशोपि न बभूव ततः क्रोधपरो मुनिः ॥
व्याकुलात्मा महाविद्यां वशिष्ठः शम्भुमुद्यतः ।
हिराचम्य महाशापः प्रदत्तश्च सुदारुणः ॥
तेनैव मुनिना नाथ ! मुनेरग्रे कुलेश्वरी ।
आजगाम महाविद्या योगिनामभयप्रदा ॥
अकारणमरे विप्र ! शापो दत्तः सुदारुणः ।
मम पूजां न जानासि मत्कुलागमचिन्तनम् ॥
कथं योगाभ्यासवशात् मत्पादाम्भोजदर्शनम् ।
प्राप्नोति मानुषो देवो मम ध्यानमदुःखदम् ॥
यः कुलार्थी सिद्धमन्त्रो महेदाचारनिर्म्मलम् ।
ममैव साधनं पुण्यं वेदानामप्यगोचरम् ॥
बौद्धदेशेऽथर्व्ववेदे महाचीने सदा व्रज ।
तत्र गत्वा महाभावं विलोक्य मत्पदाम्बुजम् ॥

मत्कुलज्ञो महर्षे ! त्वं महासिद्धो भविष्यसि ।
एतद्वाक्यं कथित्वा सा वायव्याकाशगामिनी ॥
निराकाराऽभवत् शीघ्रं ततः साकाशवाहिनी ।
ततो मुनिवरः श्रुत्वा महाविद्यासरस्वतीम् ॥
जगाम चीनभूमौ च यत्र बुद्धः प्रतिष्ठितः ।
पुनः पुनः प्रणम्यासौ वशिष्ठः क्षितिमण्डले ॥
रक्ष रक्ष महादेव ! बुद्धरूपधराव्ययः (य !) ।
अति दीनं वशिष्ठं मां सदाव्याकुलचेतसम् ॥
ब्रह्मपुत्रं महादेवीसाधनायाजगाम च (यः) ।
सिद्धिमार्गं न जानामि देवमार्गपरोहरः (१) ।
तवाचारं समालोक्य भयानि सन्ति मे हृदि ॥
तन्नाशय मम क्षिप्रं दुर्व्वुद्धिं वेदगामिनीम् ।
वेदबहिष्कृतं कर्म्म सदा ते चालये प्रभो ! ॥
कथमेतत्प्रकारञ्च मद्यं मांसं तथाङ्गनां (ना)
सर्व्वे दिगम्बराः सिद्धाः रक्तपानोद्यता वराः ।
मुहुर्मुहुः प्रपिबन्ति रमयन्ति वराङ्गनाम् ॥
सदा मांसासवैः पूर्णा मत्ता रक्तविलोचनाः ।
निग्रहानुग्रहे शक्ताः पूर्णान्तःकरणोद्यताः ॥
वेदस्यागोचराः सर्व्वे मद्यस्त्री-सेवने रताः ।
इत्युवाच महायोगी दृष्ट्वा वेदबहिष्कृतम् ॥
प्राञ्जलिर्व्विनयाविष्टो वद चैतत्कुलप्रभो ! ।
मनः प्रवृत्तिरेतेषां कथं भवति पावन (२)(नो) ॥

---

(१) सदामार्गपरोहरः । वि । विक्रमपुरादानीतं पुस्तकं वि-संज्ञया निर्द्दिष्टम् ।
(२) पामरः (रा) वि ।

कथं वा जायते सिद्धि र्बंदकार्य्यं विना प्रभो ! ।

बुद्ध उवाच ।

वशिष्ठ ! शृणु वक्ष्यामि कुलमार्गमनुत्तमम् ।
येन विज्ञानमात्रेन रुद्ररूपी भवेत् क्षणात् ॥
सङ्क्षेपेण सर्व्वसारं कुलसिद्ध्यर्थमागमम् ।
आदौ शुचि र्भवेद्वीरो विवेकाक्रान्तमानसः ।
पशुभावस्थिरचेताः पशुसङ्गविवर्जितः ॥
एकाकी निर्जने स्थित्वा कामक्रोधादिवर्जितः ।
सदा योगाभ्यासरतो योगशिक्षादृढ़व्रतः ॥
वेदमार्गाश्रयो नित्यं वेदार्थनिपुणो (१) महान् ।
एवं क्रमेण धर्म्मात्मा शीलौदार्य्यगुणान्वितः ॥
धारयेन्मारुतं नित्यं श्वासमार्गे मनोलयम् ।
एवमभ्यासयोगेन वशी योगी दिने दिने ॥
शनैः शनैः कृताभ्यासाद्देहे खेदोद्गमोऽधमः ।
मध्यमः स्वल्पसंयुक्तो भूमित्यागः परो मतः ॥
प्राणायामेन सिद्धिः (द्धः) स्यान्नरो योगेश्वरो भवेत् ।
योगी भूत्वा कुम्भकज्ञो मौनी भक्तो दिवानिशम् ॥
शिवे कृष्णे ब्रह्मपदे एकान्तभक्तिसंयुतः ।
ब्रह्म-विष्णु-शिवा एते वायवीगतिचञ्चला ॥
एवं विभाव्य मनसा कर्म्मणा वचसा शुचिः ।
शक्तौ चित्तं समाधाय चिद्रूपायां स्थिराशयः ॥
ततो महावीरभावं कुलमार्गमहोदयम् ।
शक्तिचक्रं सत्वचक्रं वैष्णवं नवविग्रहम् ॥

---

(१) निपुणः पुमान् । वि ।

समाश्रित्य भजेन्मन्त्री कुलकात्यायनीं पराम् ।
प्रत्यक्षदेवतां श्रीदां चण्डी देवगा (?) निकृन्तनीम् ॥
चिद्रूपां ज्ञाननिलयां चैतन्यानन्दविग्रहाम् ।
कोटिसौदामिनीभासां सर्व्वतत्त्वस्वरूपिणीम् ॥
अष्टादशभुजां रौद्रीं शिवमांसाचलप्रियाम् ।
आश्रित्य प्रजपेन्मन्त्रं कुलमार्गाश्रयो नरः ।
कुलमार्गात् परं मार्गं को जानाति जगत्त्रये ।
एतन्मार्गप्रसादेन ब्रह्मा स्रष्टा स्वयं महान् ॥
विष्णुश्च पालने शक्तो निर्म्मलः सत्त्वरूपधृक् ।
सर्व्वसेव्यो महापूज्यो यजुर्व्वेदाधिपो महान् ॥
हरः संहारकर्त्ता च वीरेशो-(१)त्तममानसः ।
सर्व्वेषामन्तकः क्रोधी क्रोधराजो महाबली ॥
वीरभावप्रसादेन दिक्पाला रुद्ररूपिणः ।
मासेनाकर्षणं सिद्धिं द्विमासे वाक्पतिं भवेत् ॥
मासत्रयेण संयोगी जायते सुरवल्लभः ।
एवं चतुष्टये मासि भवेद्दिक्पालगोचरः ॥
पञ्चमे पञ्चबाणः स्यात् षष्ठे रुद्रो भवेद्ध्रुवम् ।
एतदाचारसारं हि सर्व्वेषामप्यगोचरम् ॥
एतन्मार्गं कौलमार्गं कौलमार्गात् परं न हि ।
योगिनां दृढ़चित्तानां भक्तानामेकमासतः ॥
कार्य्यसिद्धिं भवेन्नारी कुलमार्गप्रसादतः ।
पूर्णयोगी भवेद्विप्रः षण्मासाभ्यासयोगतः ॥

---

(१) मत्तमानसः । पाठान्तरम् ।

शक्तिं विना शिवोऽशक्तः किमन्ये जड़बुद्धयः ।
इत्युक्त्वा बुद्धरूपी च कारयामास साधनम् ॥
कुरु विप्र ! महाशक्तिसेवनं मद्यसाधनम् ।
महाविद्यापदाम्भोजदर्शनं समवाप्स्यसि ॥
एतत् श्रुत्वा गुरो र्वाक्यं स्मृत्वा देवीं सरस्वतीम् ।
मदिरासाधनं कर्त्तुं जगाम कुलमण्डपे ॥
मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च ।
पुनः पुनः साधयित्वा पूर्णयोगी बभूव सः ॥

---

(२)

[ब्रह्मयामले देवीश्वरसंवादे प्रथमपटले ।]

"ब्रह्मणो मानसः पुत्रो वशिष्ठः स्थिरसंयमी ।
तारामाराधयामास पुरा नीलाचले मुनिः ॥ १३ ॥
जपन् स तारिणीं विद्यां कामाख्यायोनिमण्डले ।
गमयामास वर्षाणामयुतं ध्यानतत्परः ॥ १४ ॥
वर्षायुतेन तस्यैवं चिरमाराधिता सती ।
नानुग्रहं चकारासौ तारा संसारतारिणी ॥ १५ ॥
अथासौ पितरं गत्वा ब्रह्माणं परमेष्ठिनम् ।
कोपेन ज्वलितो विद्यां तत्याज पितुरन्तिके ॥ १६ ॥
द्वादशादित्यसङ्काशं तपोभि र्ज्वलितं मुनिम् ।
ब्रह्मा हि स मुनिं प्राह शृणु पुत्र ! वचो मम ॥ १७ ॥
तत्त्वज्ञानमयी विद्या तारा भुवनतारिणी ।
आराधय श्रीचरणमनुद्विग्नेन चेतसा ॥ १८ ॥

अस्याः प्रसादादेवाहं भुवनानि चतुर्दश ।
सृजामि चतुरो वेदान् कलयामि स्म लीलया ॥ १८ ॥
एनामेव समाराध्य विद्यां भुवनतारिणीम् ।
तत्त्वज्ञानमयो विष्णु र्भुवनं पालयत्यसौ ॥ २० ॥
संहारकाले च हरो रुद्रमूर्त्तिधरः परः (ं) ।
तारामेव समाराध्य संहरत्यखिलं जगत् ॥ २१ ॥

.....

वशिष्ठ उवाच ।

देवानामादिभूतस्त्वं सर्व्वविद्यामयः प्रभो ! ।
कथं दत्ता दुराराध्या विद्या मह्यमियं त्वया ॥ २३ ॥
सहस्रवत्सरान् पूर्व्वं मियमाराधिता पुरा ।
नीलाचले निवसता हविष्यं भुञ्जता मया ॥ २४ ॥
तथापि तात ! तारिण्याः करुणा मयि नाभवत् ।
ततो गण्डूषमात्रन्तु काले काले पिबन् जलम् ॥ २५ ॥
आराधयामि तां देवीं वत्सराणां सहस्रकम् ।
तथापि यदि नैवाभूत्तारिण्याः करुणा मयि ॥ २६ ॥
तथा(दा)हमेक-पादेन तिष्ठन्नीलाचलोपरि ।
परं समाधिमासाद्य निराहारो दृढ़व्रतः ॥ २७ ॥
तामेवाकरुणां ध्यायन् जपंस्तामेव सर्व्वदा ।
अतिवाहितवान् वर्षं सहस्राष्टकमुत्तमम् ॥ २८ ॥
एवं दशसहस्रन्तु वर्षाणामहमीश्वरीम् ।
कामाख्यायोनिमाश्रित्य समाराधितवान् प्रभो ! ॥ २९ ॥
अद्याप्यनुग्रह स्तस्या स्तयापि न हि दृश्यते ।
अत स्त्यजामि दुःसाध्यां विद्यामेतां सुदुःखितः ॥ ३० ॥

इति तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः ।
उवाच शान्तयन् पुत्रं वशिष्ठं मुनीनां वरम् ॥ ३१ ॥

ब्रह्मोवाच ।

वशिष्ठ ! वत्स ! गच्छ त्वं पुन र्नीलाचलं प्रति ।
तत्रस्थितो महादेवी माराधय दृढ़व्रतः ॥ ३२ ॥
कामाख्या-योनिमाश्रित्य जगतः परमेश्वरीम् ।
अचिरादेव ते सिद्धि र्भविष्यति न संशयः ॥ ३३ ॥
एतस्याः सदृशी विद्या काचिन्न हि जगत्त्रये ।
इमां त्यक्त्वा पुन र्विद्यां अन्यां कां त्वं ग्रहीष्यसि ॥ ३४ ॥
इति तस्य वचः श्रुत्वा प्रणम्य पितरं मुनिः ।
पुन र्जगाम कामाख्या योनिमण्डलसन्निधिम् ॥ ३५ ॥
तत्र गत्वा मुनिवरः पूजासम्भारतत्परः ।
आराधयन् महामायां वशिष्ठोऽपि जितेन्द्रियः ॥ ३५ ॥
अथाराधयत स्तस्य सहस्रं परिवत्सरान् ।
जग्मु स्तारा-महादेवी-पादाम्भोजा-नुवर्त्तिनः ॥ ३७ ॥
तथापि तां प्रति प्रीता यदा नाभून्महेश्वरी ।
तदा रोषेण महता जज्वाल स मुनीश्वरः ॥ ३८ ॥
तदा जलं समादाय तां शप्तुमुपचक्रमे ।
एतस्मिन्नेव काले तु रुष्टमालोक्य तं मुनिम् ॥ ३९ ॥
चचाल वसुधा सर्व्वा सशैल-वनकानना ।
हाहाकारो महानासीद्देवि ! देवेषु सर्व्वतः ॥ ४० ॥
ततो बभूव पुरत स्तारा संसार-तारिणी ।
वशिष्ठ स्तां समालोक्य शशापातीवदारुणम् ॥ ४१ ॥

ततो देवी वशिष्ठेन शप्ता न फलदा भवेत् ।
चीनाचारं विना नैव प्रसीदामि कदाचन ॥ ४२ ॥
उवाच साधकश्रेष्ठं वशिष्ठमनुनीय सा ।
रोषेण दारुणमनाः कथं मा मनुशप्तवान् ॥ ४३ ॥
मयि आराधनाचारं बुद्धरूपी जनार्दनः ।
एक एव विजानाति नान्यः कश्चन तत्वतः ॥ ४४ ॥
वृथैवायास बहुल (लं) कालोयं गमित स्त्वया ।
विरुद्धाचारशीलेन मम तत्त्वमजानता ॥ ४५ ॥
उद्बोधरूपिणो विष्णोः सान्निध्यं याहि साम्प्रतम् ।
तेनोपदिष्टाचारेण मामाराधय सुव्रत ! ॥ ४६ ॥
तदैवाशु प्रसन्नास्मि त्वयि यस्या (विप्र) न संशयः ।

[द्वितीयपटलं ।]

श्रीभैरव उवाच ।

ततः प्रणम्य तां देवीं वशिष्ठोऽसौ महामुनिः ।
जगामाचारविज्ञानवाञ्छया बुद्धरूपिणम् ॥ १ ॥
ततो गत्वा महाचीनदेशे ज्ञानमयो मुनिः ।
ददर्श हिमवत्पार्श्वे साधकैश्वरसेविते ॥ २ ॥
रणज्जघनरावेण रूपयौवनशालिना ।
मदिरामोदचित्तेन विलासोल्लसितेन च ॥ ३ ॥
शृङ्गारसारवेशेन जगन्मोहनकारिणा ।
भयलज्जाविहीनेन देव्या ध्यानपरेण च ॥ ४ ॥

कामिनीनां सहस्रेण परिवारितमीश्वरम् ।
मदिरापानसञ्जात-मन्दमन्दविलोचन (१) ॥५॥
दूरादेव विलोक्यैनं वशिष्ठो बुद्धरूपिणम् ।
विस्मयेन समाविष्टः स्मरन् संसारतारिणीम् ॥ ६ ॥
किमिदं क्रियते कर्म्म विष्णुना बुद्धरूपिणा ।
वेदवादविरुद्धोयमाचारोऽसम्मतो मम ॥ ७ ॥
इति चिन्तयत स्तस्य वशिष्ठस्य महात्मनः ।
आकाशवाणी प्राहाशु मैवं चिन्तय सुव्रत ! ॥ ८ ॥
आचारः परमार्थोऽयं तारिणीसाधने मुने ! ।
एतद्विरुद्धभावस्य मते नासौ प्रसीदति ॥ ९ ॥
यदि तस्याः प्रसादं त्वमचिरेणाभिवाञ्छसि ।
एतेन चीनाचारेण तदा तां भज सुव्रत ! ॥ १० ॥
आकाशवाणीमाकर्ण्य रोमाञ्चितकलेवरः ।
वशिष्ठो दण्डवद्भूमौ पपातातीवहर्षितः ॥ ११ ॥
अथोत्थायाचिरेणासौ कृताञ्जलिपुटो मुनिः ।
जगाम विष्णोः शरणं बुद्धरूपस्य पार्व्वति ! ॥ १२ ॥
अथासौ तं समालोक्य मदिरामदविह्वलः ।
प्राह बुद्धः प्रसन्नात्मा किमर्थं त्वमिहागतः ॥ १३ ॥
अथ बुद्धं प्रणम्याह भक्तिनम्रो महामुनिः ।
यदुक्तं तारिणीदेव्या निजाराधनकर्म्मणि ॥ १४ ॥
तत् श्रुत्वा भगवान् बुद्ध स्तत्त्वज्ञानमयो हरिः ।
वशिष्ठं प्राह मज्ज्ञानं (२) चीनाचाराधिकारणात् (णम्) ॥१५॥

---

(१) मन्दमन्दावलोकनमेव साधीयान् ।

(२) मज्ज्ञानं, मानां पञ्चमकाराणां ज्ञानमित्यर्थः ।

न प्रकाश्योयमाचार स्तारिण्याः सर्व्वदा मुने ! ।
तव भक्तिवशेनास्मि प्रकाश्यमिह तत्परः ॥ १६ ॥

बुद्ध उवाच ।

अथाचारविधिं वक्ष्ये तारादेव्याः सदुद्दिदम् ।
यस्यानुष्ठानमात्रेण भवाब्धौ न निमज्जसि ॥ १७ ॥
समस्तशोकशमन मानन्दादिविभूतिदम् ।
तत्त्वज्ञानमयं साक्षादिमुक्तिफलदायकम् ॥ १८ ॥
स्नानादि मानसः शौचो मानसः प्रवरो जपः ।
पूजनं मानसं दिव्यं मानसं तर्पणादिकम् ॥ १९ ॥
सर्व्व एव शुभः कालो नाशुभो विद्यते क्वचित् ।
न विशेषो दिवारात्रौ न सन्ध्यायां महानिशि ॥ २० ॥
वस्त्रासन-स्थानगेह-देहस्पर्शादिवारिणः ।
शुद्धिं न चाचरेत्तत्र निर्व्विकल्पं मन श्चरेत् ॥ २१ ॥
नात्र शुद्ध्याद्यपेक्षास्ति न चामेध्यादिदूषणम् ।
सर्व्वदा पूजयेद्देवीमस्नातः कृतभोजनः ॥ २२ ॥
महानिश्यशुचौ देशे बलिं मन्त्रेण दापयेत् ।
स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं स्त्रियाः ॥ २३ ॥

[अतःपरं यदुक्तञ्च तदन्यत्र प्रपञ्चितम् ।]

[तृतीयपटले ।]

"पूजाकालं विना नैव पश्येच्छक्तिं दिगम्बराम् ।
पूजाकालं विना नैव सुरा पेया च साधकैः ।
आयुषा हीयते दृष्ट्वा पीत्वा च नरकं व्रजेत् ॥"

[अयमेव वृत्तान्तो महाचीनाचारक्रमेऽपि सविस्तरं वर्णितः ।]

(३)

[बुद्धस्य कामशास्त्राचार्य्यत्वं स्रष्टमुक्तं मीननाथकृत-
स्मरदीपिकायाम् ।]

"सारं निष्कृष्य बुद्धादिमुनीनां प्रमुखात् श्रुतम् ।
श्रीमता मीननाथेन क्रियते स्मरदीपिका ॥
कामशास्त्रस्य तत्त्वज्ञा भवन्ति योषितः सदाः ।
ये वै शास्त्रं न जानन्ति रमन्ते वृषभा यथा ॥"

[महाचीनक्रमो गान्धर्व्वेऽपि वर्णितः ।]

NOTICE.

The Varendra Research Society is prepared to buy, borrow or have transcripts, at reasonable price or cost of the following works :—

I. The Nyasa or Kasikavivaranapanjika by Jinendra Buddhi.

II. Tantra-Pradipa, Dhatu-pradipa or any other works by Maitreya Rakshita.

III. Anunyasa or Nyasoddyota.

The owners of the aforesaid works are invited to communicate, stating terms, with Pandit Srish Chandra Chakravarti B. A. Professor of Sanskrit, Rajshahi College, Rajshahi, Bengal.

VARENDRA RESEARCH SOCIETY'S PUBLICATIONS

1. **Gauda-Rajamala**, a dynastic History of Bengal from the earliest times to the Mussalman conquest, (in Bengali), by Ramaprasad Chanda B. A., Rs. 2|- or 2s. 8d.

2. **Gauda-Lekha-mala**, inscriptions of the Pala-Kings of Bengal and Bihar, text in Nagari character with Bengali translation and notes by Akshay Kumar Maitra B. L., Rs. 2, or 4s.

3. **Tara-tantram**, text in Nagari character, edited by Girish Chandra Vedantatirtha, with an Introduction in English by Akshay Kumar Maitra B. L., 8 as. or 8d.

4. **Nyasa or Kasika-Vivarana-Panjika** by Jinendra Buddhi, Edited by Srish Chandra Chakravarti B. A. Vol 1, Part I (Adhyaya I, Pada I of Panini) Re 1. or 1s, 6d.

TANTRIK TEXTS AND WORKS ON TANTRA BY ARTHUR AVALON

1. **Tantrabhidhana** with **Vija-Nighantu** and **Mudra-Nighantu** (text). 2 s or Re 1.8.

2. **Shatchakra-nirupana** and **Paduka-panchaka** (text). 3 s or Rs 2.

3. **Prapanchasara** (text) (will be ready soon).

4. **Tantra of the Great Liberation** (**Mahanirvana Tantra**) English translation from Sanskrit with Introduction and commentary, 10 s or Rs. 8

5. **Hymns to the Goddess**, English translation with Introduction and commentary, 4s or Rs. 3

6. **Principles of Tantra** (**Tantratattva**) [In the Press].

7. **The Six Centres** (**Shatchakra-nirupana**) [In the Press].

8. **Ocean of Kula Tantra** (**Kularnava-tantra**) [In preparation].

London—Luzac & Co, 46, Great Russel Street, W. C,
Calcutta,—Thacker, Spink & Co.
Rajshahi,—Varendra Research Society.

Printed by Upendra Natha Chakravarti, at the Sanskrit Press.
No. 5, Nandakumar Chaudhury's 2nd Lane, Calcutta.

BL
11
T5
19

Tantras. Tārātantram

Robarts Library
DUE DATE:
Oct. 23, 1992

For telephone renewals
call
978-8450

GET A
HEADSTART